हरिसं· श्रीसहजानंदस्वामिने नमः ॥ वंदारुमंदारमुदारविंदं दयाभयद्वेषमनाथनाथं ॥ निर्दंभतोषं कपटप्रमोषं नमा सर्ग·३
॥१॥ मि धर्मावनपावनेक्षं ॥१॥ अथ परमेश्वरावतारकारणनिरूपणाय तृतीयं सर्गमारभते अथ मुनिविहितस्तु
तिश्रुत्यनंतरम् मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथो अथेत्यमरः परोक्षादेः परः अक्षरात्परतः परस्तुतिश्रुतेः
अस्मै नारायणमुनिः पुरितः सर्वतः निषण्णानुपविष्टान् तान्मुनीन् निरीक्षमाणो वीक्षमाणः सन् अघपापं नि
वर्तयतीति तेन मुनीनां विलोकनेन दर्शनेन वक्त्रं अदभ्रं अदभ्रं बहुलं वक्तुरित्यमरः प्रसन्नो स्मितः प्रसन्नेन

अथावदत्तान्परितो निषण्णान्निरीक्षमाणः कृपयापरो ऽस्मै ॥ इति प्रसन्नो वक्त्रं मुनीनां विलोकनेनाघनिवर्त
नेन ॥१॥ लोकेषु यत्संचरतां मुनीनां मुहुर्मुहुर्मत्रागमनं जनानां ॥ जातं कुतः स्विन्निलयात्सुराणां पाताललोका
द्वाथवा धरित्र्याः ॥२॥ प्रकारेण कृपया दयया अवदत् प्रकृष्टा कृपया समीक्षमाणः इत्यनेन संबंधः उपेंद्रवज्रा
वृत्तं लक्षणं तूक्तं प्राक् ॥१॥ लोकेष्विति जनान् लोकान् जनालोके महर्लोकान्यस्लोके च पामरे इति मेदिनी उ
द्धर्तुं जनानां संसारादुद्धारकर्तुमित्यर्थः लोकेषु जनेषु भुवनेषु वा लोको जने ऽपि भुवने इति मेदिनी संचरतां संचारं
कुर्वाणानां संपूर्वाच्चरतेः लट् नमत्रागमनं ... युष्माकं ऋषीणां वेदानां वसिष्ठादीनां वा ऋषिर्वेदे वसिष्ठादौ ॥१॥

चित्ति मेदिनी अत्र बदरिकाश्रमे आगमनं यत् जातं तत् यन्नदोर्निससंबंधान्नच्छुद्दलाभः कुतः निलयात् कस्मा
त्स्थानात् जातं स्विन् नु सुराणां निलयात् देवलोकात् स्विदिति वितर्के स्वित्प्रश्ने च वितर्के च तथैव पादपूरणे इति
मेदिनी प्रश्ने वा अथवा पाताललोकात् अथवा धरित्र्याः धरण्याः धरा धरित्री धरणी इत्यमरः इंद्रवज्रावृत्तं
३ ॥ श्रुत्वेति तदा नारायणर्षिर्बद्धलागमनप्रश्नसमये मुनिषु इंद्राः मुनिवराः निर्धारणषष्ठ्याः समासनिषेधा
त् सप्तमी तत्पुरुषः मंगले साधुर्मंगल्यात्तत्र साधुरिति यत्प्रत्ययः मंगल्या मूर्त्तिर्यस्य तस्य कल्याणमूर्त्तेः स

श्रुत्वा वदंतस्तस्य मनोज्ञवाक्यं हस्तान् समानीय तदा मुनींद्राः ॥ मंगल्यमूर्त्ते रमृतोपमानं तापत्रयोन्मूलनमा
र्त्तबंधो ॥३॥ वपुरूपार्थमयमूर्त्तेर्वा मंगलासितदूर्वायामुमायां पुंसि भूम्नि जे ॥ नपुंसके तु कल्याणे सर्वा
र्थरक्षणे ऽपि चेति मेदिनी ॥ आर्त्तानां तापत्रयपीडितानां बंधुर्मित्रं भ्राता बांधवो वा बंधुः स्यात्पुंसि बंधुके
मित्रे भ्रातरि बांधवे इति मेदिनी ॥ तस्य नारायणर्षेः अमृतमुपमानं यस्य तत्सुधोपमानं पीयूषममृतं सु
धे समरे ऽनंतापानामाध्यात्मिकादिसंतापानां त्रयं त्रिकं तदुन्मूलयति इति तथाभूतं ॥ मनोज्ञं मनोहरं
यद्वाक्यं तत् ॥ श्रुत्वा हस्तान् समानीय ... संहतांजलिपुटाः संत इत्यर्थः अवदन् ऊचुः वृत्तमिंद्रवज्रा ॥ ३

इहेति । इह पावनपवित्रताकर्तृः तीर्थेषु क्षेत्रेषु कुरुक्षेत्रपुष्करजलप्रधानस्थानेषु वा यात्रागमनं तस्या विधिस्तया वि
धातुं कर्तुमिच्छया विपूर्वो दधातेः सनि मीमा इत्यादिना इसादेशः । अत्र लोपो ऽभ्यासस्येत्यभ्यासलोपः ततो भावे
स्त्रियामप्रत्ययस्ततष्टाप् । तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरजःसु च । अवतारर्षिजुष्टांबुपात्रोपाध्यायमं
त्रिष्विति मेदिनी । यात्रा तु यापने ऽपि स्याद्गमनोत्सवयोः स्त्रियामिति च । भूमितले भूतले धरित्र्या ऊर्ध्वभागे इ
तियावत् तलं स्वरूपे ऽधः ऊर्ध्वे इति मेदिनी । चरंतो भ्रमतः ते वयं ते इति मुनिविशेषणं तु भगवतः पादादि

इहागताः पावनतीर्थयात्राविधित्सया भूमितले चरंतः । संदर्शनायाद्य मनोहरस्य ते वर्षतो भारतनामधेया
त् ॥४॥ नारायणस्तान्मुनीनुवाच प्रीतिप्रफुल्लांबुजदिव्यनेत्रः । अद्य प्रजा भारतवर्षसंस्थाः किमाचरंत्यात्म
विदां वरिष्ठाः ॥५॥ त्वादृशेत्वाभावप्रसक्तेः भारतमिति नामधेयं यस्य तत्तस्मात् । वर्षतो वर्षात् भरतखंडादि
त्यर्थः पंचम्यास्तसिल् मनोहरस्य स्वभावतो निजजनचित्तहरस्य तव संदर्शनाय सम्यग्दर्शनं कर्तुम् क्रियार्
थोपपदस्येत्यादिना कर्मणि चतुर्थी । तादर्थ्ये वा । अद्य अस्मिन्दिने अद्यात्राह्नीत्यमरः इहाश्रमे आगता आ
गमनं कृतवंतो वयम् उपजातदिदृक्षतम् ॥४॥ नारायण इति दिव्ये वल्गुनी कंदर्शे इतियावत् ते च ते नेत्रे च अं

बुजे इव ये दिव्यनेत्रे प्रीत्या मुनिदर्शनजनितप्रसन्नतया प्रफुल्ले विकसिते अंबुजदिव्यनेत्रे यस्य सो नारायणः ता
न्मुनीन् पुनरपि इति वक्ष्यमाणप्रकारेण उवाच अवदत् हे आत्मविदां वरिष्ठाः आत्मविदुषाः भारतवर्षसंस्था
भरतखंडस्थितिमित्यः प्रजा जनाः प्रजा स्यात्संततौ जने इत्यमरः अद्य अधुना किमाचरंति किं हेतुमालंब्य वर्त
त इत्यर्थः किमिति प्रश्ने किं पृच्छायामित्यमरः ॥५॥ कुदीयस इति कुदीयसो ऽतिशयेन हृदयात् इदन्ताशास्त्रक
र्थे द्विवचनविभज्येत्यादिना ईयसुन् प्रत्ययः रकृतो हलादेर्लघोरिति ऋकारस्य रेफादेशः टेरिति टिलोप

कुदीयसो मत्कृतधर्मसेतून् कच्चित्प्रजास्ताः परिपालयंति । नृजन्म संप्राप्य सुरैरलभ्यं धर्मानुवृत्तिर्हि यतः प्रि
या मे ॥६॥ स्वृ दृढं स्थूले नितांते च प्रगाढे बलवत्यपीति मेदिनी । मया कृता अतिप्रयत्नेन निष्पादिता ये धर्म
सेतवः सकृतालयस्तान् सेतुराली च वरणे इति विश्वः ताः भारतवर्षसंस्था प्रजा जनाः परिपालयंति कच्चित्
कच्चिदिति प्रश्ने कच्चित्कामप्रवेदने । प्रश्ने हर्षे मंगले चेति मेदिनी प्रश्ने हेतुमाह नृजन्मेति यतो हेतोः यत्तद
स्ततो हेतोरित्यमरः सुरैरमरैः अमरा निर्जरा देवास्त्रिदशा विबुधाः सुरा इत्यमरः अलभ्यं लब्धुमशक्य
म् दुर्लभमप्राप्ता वस्मासो रस्तुपधादितियत् । नाकिलिङ्गे तिनाकार्थे नृजन्म मनुष्यजन्म मनुष्या मानुषा

मर्त्या मनुजा मानवा नराः॥ स्युः पुमांसः पंचजनाः पुरुषाः पूरुषा नर इत्यमरः जनिरुत्पत्तिरुद्भवः स्त्री वेतुज
न्म इति हैमः संप्राप्य धर्मानुवृत्तिः स्वस्ववर्णाश्रमोचितधर्मानुष्ठानम् मे मम प्रियापि प्रेमास्पदं भूता हि निश्चित
मेव हि हेतावधारणे इत्यमरः भगवतो धर्मानुवृत्तिः प्रियत्वमुक्तं भागवते चतुर्थस्कंधे॥ अहो ममामी वितरं
त्यनुग्रहं हरिं गुरुं यज्ञभुजामधीश्वरम्। स्वधर्मयोगेन यजंति मामका निरंतरं क्षोणितले दृढव्रता इति॥ धर्म
स्य पालनेनापि रक्षणमुक्तं स्मृतौ॥ एकमेवेप्सितं लोके सर्वेषामपि देहिनाम्॥ तन्मूलं तो स्मृतो धर्मस्तं रक्षे

अचा महर्षीतिन्यायांतरास्ते पुनस्तमाकूर्चदंतां वरिष्ठाः॥ दुरंतमेतर्हि जगत्स्वधर्मप्रजाः प्रजार्त्तिक्षपणाव्रजं
ति॥ ७॥ द्यूलतस्ततइति॥ ६॥ अवाप्येति अवाप्तोऽधिगतो महर्षस्यानंदस्य अतिशयो ऽसंतत्वं येस्तानि अंत
राण्यात्मानो येषां ते तथोक्ताः अंतरमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्ये छिद्रात्मीयविना बहिरवस
रमध्यात्मसदृशेष्विति मेदिनी। वदंतीति वदंतो वाग्मिनस्तेषां वरिष्ठाः अतिशयेन वराः सद्गुणैः श्रेष्ठाः वरि
ष्ठाः यद्वा करुणया आच्छादने इत्यस्मान्महतीति वरिष्ठेति कुप्रत्ययोनुलोपो क्तस्य श्रेसुरुत्वाह्लो महद्गुणवाच
कः ततो मतुपिति रुगुणमुक्ताउरवो महांतः पुरुषा इत्यर्थः गुणवचनेभ्यो मतुपो लुगिति इष्ट इति मतुपो लु ॥३॥

क् ततोऽतिशायार्थे इष्ठन्प्रत्ययः अतिशयेन उरवो वरिष्ठाः प्रख्यातसद्गुणा महापुरुषा इत्यर्थः प्रियस्थिरे
त्युरुशब्दस्य वरादेशः ते मुनयः पुनः मुहुः तं नारायणर्षिं आकूर्चतोचन्। प्रजा जनास्तासामर्त्तिः पीडा तां क्ष
पयति नाशयतीति तत्संबुद्धौ हे जनपीडनाशक आर्त्तिः पीडाधनुष्कोट्योः स्त्रामेलब्धोस्वसत्त्वयोरिति मेदि
नी जगति जंगमजनेषु विष्टपेषु वा जगत्स्याद्विष्टपे स्त्री वं वायोनाजंगमे त्रिष्विति मेदिनी एतर्हि इदानी एते
नोरथ्योरिति मेदिनी जगति जंगमजनेषु विष्टपेषु वा जगत्स्याद्विष्टपे स्त्रीवं वायोनाजंगमे त्रिष्विति मेदिनी। ए

ष्वक्तः समीरं वसहायमाप्याधर्मः समसर्गो भुवि संप्रवृद्धः॥ तिष्यं समूलोऽस्ति वृषैकरक्षास्तिष्यं स धर्मे गुरुखोप
पाश्च॥ ८॥ तर्हि इदानी एतेनोरथ्योरिति इदमस्तर्हिल्प्रत्यय एत इत्यादेशः इदमोर्हिलिति इदमशब्दात्तर्हिल्प्रत्ययः
प्रजाजनाः दुरंतं दुःखेनांतो यस्य एतत् अस्त्यंतमित्यर्थः अधर्मस्त्वधर्मसर्वसंत इति दुर्मधर्मक्षुः संज्ञिते तिन
त्रुसमासः धर्मस्त्राप्तकरवानि चेत्यमरः तद्वृजं समधिगच्छति उपेंद्रवज्रा॥ ७॥ तदेवाह त्रिभिः श्लुक्त इति सस
र्गः सर्ग आत्मसृष्टिः तेन सह वर्त्तमानः सर्गास्तु निश्चयाध्यायमोहोत्साहात्मसृष्टिष्विति मेदिनी स्वपरिवा
रसहित इत्यर्थः अधर्मः तिष्यं कलिं तिष्यो नक्षत्रभेदे स्यात्कालाविति मेदिनी सहायं पार्श्वग्राहम् आप्य

प्राप्य आङ् प्रश्लेषोऽत्र बोध्यः शुक्रोदहनः अग्निरित्यर्थः दहनो हव्यवाहनः सप्तार्चिर्दमुनाः शुक्र इत्यमरः समी
रं मारुतं समीरमारुतमरुज्जगत्प्राणसमीरणाः इत्यमरः सहायं आप्य वसंप्राप्य इव यत्नाद्दवयमायांसादितिवि
श्वः भुवि पृथिव्यांसमूलोबद्धमूलः सन् संप्रवृद्धः असंतं वृद्धिंगतोऽस्ति पृथमेवैकं रक्षंतीति पृथेकरक्षाः यद्वाए
केऽनमारक्षारक्षकाः वृषस्य धर्मस्यैकरक्षाः अनमरक्षकाः धर्मस्य सुपलक्षणं भक्तिज्ञानवैराग्यादीनां तेन सध
र्म भक्तिज्ञानवैराग्यैकरक्षका इत्यर्थः गुरवः संप्रदायप्रवर्त्तकाचार्यपदस्थाः अमेऽपिवाद्व्यानोपदेष्टारो वीतरा॰

प्रोत्साहितास्तैः स्वसमाश्रितास्ते जना विभिदंतिवृषस्य सेतुन् ॥ त्वया कृतान् ग्विषयप्रसक्ताः कुर्वंति पापानि म॰
हांस्यजस्रं ॥८॥ गिप्रभृतयः नृपा धर्मप्रपोषका राजानस्तु तभयेः पित्रधर्मे तिष्ठंतिसम्यग धर्मं त्वाखावलंबना
दिभिर्लोकान् प्रतारयंतीत्यर्थः ॥ ७ ॥ प्रोत्साहिता इति तैः पूर्वोक्तैर्गुरुभिर्नृपैश्च प्रोत्साहिताः कृतोत्साहाः यतः स्व
समाश्रिताः अमस्वधर्मनिष्ठगुर्वाद्यद्दृष्टेन कृतात्माश्रयाः ते जनाः लोकाः येप्राक् धर्मेणैवावर्त्तंत इति शेषः
त्वया कृतान् वृषस्य धर्मस्य सेतून् मार्गान् विशेषतो भिंदंति ज्ञाकुक दितिएतादृग्गुर्वाश्रयक्षणेएवासात् क्ष॰
टिसंजसाक्वायसद्योज्ज्यमस्तु चक्षुतेसमरः विषयेषु अनादिकालोपभुक्तेषु प्रसक्ताः प्रकर्षेणकृतासक्तयः ॥४॥

संतः अजस्रं निरंतरं महांतिपापानि पापकर्माणि कुर्वंति ॥ ९ ॥ जाने तियद्यतः जगसां भूमौ जगति भुवनेऽस्मा॰
यामितिमेदिनी अधर्मे वृद्धिः जाताऽस्ततः त्वामनालयस्य यमपुरस्य त्वामनो यमराडमरइत्यमरः अध्वा मार्गः प्र
वर्त्तते प्रवहतितिउपसर्गेणाधात्वर्थ इति वचनाद्धातूनामनेकार्थत्वाद्वा वर्त्ततेः प्रवहनार्थत्वं पुमांसः पुरुषाः नार्यः
स्त्रियः नदीनां गंगादीनां जलानि समुद्रमध्ये इव निरये नरके स्यात् नारकस्तु नरको निरय इत्यमरः गच्छंति व्रजंति
॥१०॥ एवं त्रिभिर्जगद्दुःखं वर्णयित्वा तदवनं प्रार्थयंते नद्रक्षणं मितिहेत्रामेनिधेस्वत्रैव धेनिधिनोत्रौवधिरसि

जाताजगसांयदधर्मवृद्धिः प्रवर्त्ततेऽध्वा यमनालयस्य ॥ गच्छंतिनार्यो निरये पुमांसा नदी जलानीव समुद्रमध्ये
॥१०॥ तद्रक्षणं त्वामनिधे विधातुंनास्तीश्वरः कोपिविनात्वयास्याम् ॥ अतो धराभारतवर्षनाथो रक्षां कुरुत्वसकल
प्रजानां ॥११॥ मरः तासां तेषां वा रक्षणं तद्रक्षणं तद्विधातुं कर्तुं त्वया विना त्वां मुक्ते अस्यां त्रिलोक्यां कोऽपि
ब्रह्मापि कश्चिन्नरो वापि ईश्वरः प्रभुर्नास्ति अतः धराभारतवर्षनाथः धरा पृथिवी तत्र भारतवर्षे भरतखंडः तस्य
नाथः स्वामी त्वं सकलाः समग्रायाः प्रजाः तासाम् रक्षां रक्षणं कुरु विधत्स्व नरनारायणस्य भरतखंडाधिपतित्वमुक्तं
श्रीमद्भागवते पंचमस्कंधे भारतेऽपिवर्षे भगवान्नरनारायणाख्य आकल्पांतमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमो

॥५॥ प्रसन्नेतिजनो प्रजानामर्त्तिः पीडातां हरतीतितथोक्तः लोकदुःखहरइत्यर्थः आर्त्तिः पीडाधनुःकोटयोरितिमेदि
नी दृग्भूतंपद्मंदृक्पद्मंप्रसन्नंयद्दृक्पद्मं नेत्रकमलंतेननिरीक्षतेसौ निरीक्षमाणः निरुपसर्गपूर्वादीक्षतेःकर्त्त
रिशानच् दृक्पद्ममित्यत्रशाकपार्थिवादित्वाद्भूतशब्दलोपीसमासः नतुदृगेवपद्मंदृक्पद्ममितिमयूरव्यंसकादि
त्वात् तस्यरूपकविषयत्वात् पद्मंहित्वयं दृष्टुमक्षमं अतः नेत्ररूपंभूत्वापश्यतीतितः परिणामालंकारः अत्रप
द्मस्यप्रकृतेनतथाभूतंदृग्भूतमितिप्रथमार्थेतत्पुरुषः एवंसतिपरिणामाभिव्यक्तिर्नतुमयूरव्यंसकादिनासमा

प्रसन्नदृक्पद्मनिरीक्षमाणेजनार्त्तिहृत्तद्वचनानिश्रुत्वा॥ आर्त्तोनिसौभूद्भुवदंतरात्माहविर्भुजोनवनीतवद्द्रु
त॥१३॥ सांतस्यतस्यरूपकविषयत्वादितिनवाएवमन्यत्रसमस्तकृदयापद्मक्षिमदृक्कमलेनस्वभक्तर्षिव्रजान
विलोकयन्नित्यर्थः सनारायणर्षिः हविर्भुजो अग्नेः अंतेअंतिके अंतः प्रांतेतिकेनाशेस्वरूपेऽतिमनोहरेइति
विश्वः नवनीतवत्नवोद्धृतघृतमिव घृतमाज्यंहविः सर्पिर्नवनीतंनवोद्धृतमित्यमरः आर्त्तानिदीनानितद्व
नानितेषांमुनीनांवचनानिवाक्यानिश्रुत्वाकर्णेषुशाक्सद्यः द्रुवदंतरात्माद्रवतीतिद्रुवन्द्रुवीभवन्नंतरात्मांतः
करणंयस्यसः आसीत्अभूत्नचात्रतद्वचनानिश्रुत्वेतिसानुस्वारोविसर्गोतोदीर्घोयुक्तपरश्चेत्यत्रइतिवाक्यान्निश्च ॥५॥

स्यस्यश्रुइतिसंयुक्तपरत्वेनदीर्घत्वादुपेंद्रवज्रालक्षणासंगतिरितिवाच्यं तत्रापएवपादादौविहवर्णस्यसंयोगः
क्रमसंज्ञकः पुरस्थितेनतेनस्याद्गुरुतापिक्वचिल्लरोरिस्युक्तेरदोषः दन्र्तनंक्रादिसंयोगेइत्यादिवचनाच्चक्रादि
संयोगेपुरःस्थितेपिलघोर्गुरुत्वाभावः तथाहि तवक्रियापद्धियोममफीरभूत्छत्रिग्रहेऽपिगतंनधत्तानतः
चकुलश्यामरमेचकतामसंममप्रियेकसमेष्यतितत्पुनरिति अमञ्चलीलासितान्नमुत्तदर्पणमातपत्रंकिंद
तपत्रमथकिंशुकमौलिरत्नं किंचामरंतिलकबिंदुरबिंदुबिंबमेतद्विनोनिकुचदीप्तिमुदेनकस्येति धनंप्रदाने

तद्दक्षणंकर्त्तुमतः समेत्यछद्मदाद्यापुर्व्यवतीर्यभूमौ॥ तस्मिन्क्षणेमूर्त्तियुतश्चधर्मः पीसातदीक्षार्थमुपाजगा
म॥१३॥ नश्रुतेनकर्णेविसादि अत्रपरिणामोपमयोः संसृष्टिः॥१३॥ तद्दक्षणमितितद्दितः हिंनेनावधारण
इत्यमरः दयालुः पूर्वोक्तप्रकारेणदयावान्स्वयं अतः इत्थंदयालुत्वाद्धेतोः तद्दक्षणंतासांप्रजानांरक्षणंरक्षांक
र्त्तुंविधातुंक्ष्मायाःपृथिव्यांअवतीर्यप्रादुर्भूय यदायस्मिन्क्षणेसमेत्यछद्मदीक्षांचकार तस्मिन्क्षणेतदवसरेतत्रमूर्त्ती
स्वपत्न्यायुतोयुक्तोधर्मश्च स्वपितास्वयंधर्मदेवोऽपिप्रीसातस्यनारायणमुनेर्दीक्षातद्दीक्षातस्याइदंतद्दीक्षार्थं
चतुर्थीतदर्थार्थबलिहितसुखरक्षितैरितितत्पुरुषसमासः अर्थेननित्यसमासोविशेष्यलिंगताचेतिवक्त

यमिति उपसंख्यानान्नित्यसमासोऽयम् अर्थवाच्यस्य विशेष्यलिंगत्वेऽपि विशेष्यविशेषयोः सन्निधानात्सामान्ये
तेन नपुंसकमेव मायमिति हम् उपात्तगामनारायणांतिकं प्राप्तवान् ॥ १३ ॥ मुमोदेति दरिद्रो निर्धनजनः निधिदर्श
नेन नूनं च निधिवीक्षणेन यथा नंदति तथा धर्मो धर्मदेवः तद्वीक्षणात् तस्य हरेर्वीक्षणं दर्शनं तेनेति ततः आद्यादित्वा
त्तसिः अत्यसंतं मुमोद प्रसन्नो बभूव ईदृशोऽपि नारायणोऽपि तद्वीक्षणाद्धर्मावलोकनात् ऊर्ध्वं गतानुत्पतान्
असूनुप्राणान् पुंसि भूम्न्यसवः प्राणा इत्यमरः आदातुं गृहीतुं कामोऽयस्य स तथा विधं इव तुं कामम नसो
रपीति मकारलोपः उदतिष्ठदभ्युत्तस्थौ प्रत्युत्थानं चकारेत्यर्थः एतेनादरातिशय उक्तः धर्मदेवचरणयोः स्व

मुमोद तद्वीक्षणतोऽपि धर्मो यथा दरिद्रो निधिदर्शनेन ॥ तद्वीक्षणाद्धूर्ध्वंगतानिवासूनादातुकामोऽभ्युदतिष्ठ
दीनाः ॥ १४ ॥ नत्वा परिष्वज्य स हरिः स्वतातं सत्क्रियां तस्य चकार तूर्णं ॥ सनकुमारः पितरं हिरण्यगर्भं यथा भूत
पतिं कुमारः ॥ १५ ॥ समीपपद्देशात्प्रत्युत्थानस्यागे वसयमुत्थितवान् ऊर्ध्वप्राणा ह्युत्क्रामंति यूनः स्थविर आय
ति प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यत इति शास्त्रस्मरणादिति भावः उदोऽनूर्ध्वकर्मणीति नियमादि
होर्ध्वकर्मणि नात्मनेपदं उपमोत्प्रेक्षयोः संसृष्टिः ॥ १४ ॥ नत्वेति सः प्रत्युत्थितः स हरिः तूर्णं स्वतातं स्वजनकं ॥ ६ ॥

आदौ नत्वा प्रणम्य ततस्तदनुज्ञया परिष्वज्यालिंग्य पश्चात्तस्य सत्क्रियां सत्कारं आदरस्य क्रिया आसनपाद्या
र्घदानादिकां तां सत्क्रियां सत्कारार्थे ल्यप् आदरानादरयोः सदसती सूक्तैः चकार संपादयामास कः कमिव
सनत्कुमारो वै धात्रीमुनिः सनत्कुमारो वैधात्र इत्यमरः हिरण्यगर्भं स्वयंभुवं पितरं यथा हिरण्यगर्भो लोकेशः
स्वयंभूश्चतुराननः इत्यमरः कुमारः क्रौंचदारणः भूतपतिं भूतेशं गिरिशं यथा तथेति संबंधः भूतेशः खंडपरशु
र्गिरिशः इत्यमरः ॥ १५ ॥ मनोज्ञवाणीति नरेण विहितो रूपमानः कृतानिरूपजनः नतः कृतः प्रणामो यस्य सः सापेक्षत्वेऽ

मनोज्ञवाण्या विहितो रूपमानः कृतप्रणामः कृतवान्नरेण ॥ ताभ्यां ततोऽसौ परमेश्वराभ्यां प्राप्तुं जयदाशीर्वचनं तये
ति ॥ १६ ॥ प्रणेमतुः स्वां जननीं च मूर्ध्ना साभ्रातरौ संयुयुजेऽथ ताभ्याम् ॥ तयाशु दारप्रणपात्कृताशीस्ताववासनेसं
दतुश्च ताभ्याम् ॥ १७ ॥ विग्रामकृत्वा समासः असौ धर्मः परमेश्वराभ्यां ताभ्यां नरनारायणाभ्यां मनोज्ञवाण्या स्ने
हाल्लिभरयुक्तत्वाच्चित्तहरवाचा कृतरूपसंतम् जयेति त्वं जय सर्वदोत्कृष्टजयकारी भवेति सन्ताशीर्वचनमात्रा
वौ दत्वा कंप्राप्तुं जत् ददौ ॥ १६ ॥ प्रणेमतुरिति किं चेतिवार्थः भ्रातरौ नरनारायणौ स्वां स्वकीयां प्रसूं जातावान्म
नि स्वं त्रिषात्मीये स्वोऽधने स्त्रियामित्यमरः जननी जनयित्री मातरमितिपावत् जनयित्री प्रसूर्माता जननी

समरः मूर्त्तिर्मूर्त्तिसंज्ञां प्रणेमतुः प्रणामं चक्रतुः अथानंतरं सा मूर्त्तिः ताभ्यां पुत्राभ्यां संयुयुजे परिष्वक्तेतय
स्वपुत्रौ बाहुभ्यामालिंगितावित्यर्थः युजिर्योगे स्मात्संपूर्वोह्निद ततस्तया मूर्त्त्या असुदारस्नेहणयादसं
तस्नेहात आन्नीः हृता आन्नीर्वादो दत्तः यद्वा सा मूर्त्तिः भ्रातरौ नरनारायणाख्यौ पुत्रौ संयुयुजे ताभ्यां तया
असुदारस्नेहणयात् आन्नीः हृत्त दत्ते सन्वयः धातूनामनेकार्थत्वात्करोतेर्दानार्थत्वं तद्योगे चतुर्थी संप्रदा
नेद्दति चतुर्थी: तौ नरनारायणौ ताभ्यां धर्ममूर्त्तिभ्यां आसने आसनरूपं संददतुः आसनदानादेः पूर्वं स्तो
लोकाधिनाथः कुशलं ततो सो पप्रच्छ स्वकीयं जनकं जनार्थ्यः ॥ तु सा तमेभ्यः श्रुतमाचचक्षे भूमावधर्मप्रभवं मु
निभ्यः ॥ १८ ॥ केविहितो रुमानकृतिवाक्यावगतपूजांतर्गतत्वेः पितत्कथनं सभ्यातिनाटनद्योतनार्थं ॥ १७
लोकेति ततः आसनदानानंतरम् जनार्थ्यः जनैः स्वकल्याणार्थमभियातमः कल्याणं प्रतिवाभियाच्यः
यद्वा अर्थ्यो बुधः जनानामर्थ्यः सकलजनानामध्ये एक एव पंडित इत्यर्थः अर्थ्यो बुधे मायेचेति मेदिनी
लोकाधिनाथो लोकाधिपतिः असौ नारायणः स्वकीयं जनकं पितरं कुशलं क्षेमं पप्रच्छ विपृच्छ ब्राह्मणं
कुशलं पृच्छेत् क्षत्रबंधुमनामयं इति स्मृतेर्ब्राह्मणत्वद्योतकं आरोग्यप्रश्नं कृतवेसर्थः राभ्यः पूर्वोक्तेभ्यः ॥ ७ ॥

मुनिभ्यो कृषिगणेभ्यः श्रुतं अधर्मोस्त्रभवो यस्य तं तु सा तं लोकपीडालक्षणं भूमौ जायमानमित्तित्रोषः तुसा
तमस्मै श्रुतमितियावेमुनिभ्यः श्रुतमुसातं अस्मै पित्रे आचचक्षे कथयामास ॥ पाणांतरभावे स्वपित्रे इत्यध्या
हार्यं ॥ १८ ॥ नारायण इति अथ धर्मं प्रसुसातप्रवृत्तिकथनानंतरं असति न्यायिता मुख्यवो यस्मे सति मुत्तबहु
हर्षवान् नारायणः आननेस्वाननेबहु हृष्टि र्थैस्तेतानात्मानमेकमीक्षमाणा निसर्थः कृषीक्रान्दृषिश्रेष्ठान्
वार्त्तामुदंतं वार्त्ता प्रवृत्ती इत्यां तत उदंतः स्याद्विसमरः वार्त्ता तु चवर्त्ते ने वालिंगणो रूप्याद्युदंतयोरितिमेदिनी ॥ जं
नारायणो ध्याननवहृष्टीन् वार्त्तामृषीन्ज्ञानतिमुक्तगाद ॥ ते निर्गतां तन्मुखपद्मतो हुपीसान्वश्रएवनुश्रु
तिनिष्टचिता: ॥ १९ ॥ गादकथयामास श्रुतोश्रवणेनिष्टास्थितिर्येषां तानि चिन्तानि येषां ते श्रुतिः श्रोत्रे च
तत्कर्मणीतिमेदिनी ते मुनयः तस्य नारायणस्य मुखमास्यमेव पद्मं कमलं तस्मादिति ततः पंचमास्तसिल्
निर्गतां निःसृतां नारायणोदितामित्यर्थः वार्त्तां अक्षरासाक्षात् तन्वततइत्यर्थः ॥ तत्नेत्यंजसाद्वयमि
समरः प्रीत्या प्रेम्णा प्रीतिर्योगांतरे प्रेम्णि स्मरपत्नी मुदोः स्त्रियामिति मेदिनी अनु नारायणस्य निर्गमना
नंतरं अश्व एवनश्रुश्रुवुः अनुदीने सहार्थे च पश्चात्साद्दिश्यपयोरपी विश्वः श्रणोतेः कर्त्तरिलिड ॥ १९ ॥

हरिसं· त्रिशिखाइति तस्य नारायणस्यास्यं मुखं आस्यंमुखेच तन्मध्ये तद्भवे चस्थितयां स्थिता शिखितिमे दिनी तस्मान्निर्यंति सर्ग·२
॥८॥ निर्गच्छंतियानि वचनानितेषु एकानि केवलानि चित्तनेत्राणि येषांते एकं संख्यांतर श्रेष्ठे केवले त्तरयोश्चिन्निति
त्रिमेदिनी सकलाः समग्राः तेमुनयः वाताभावोनिवातं अव्ययं विभक्ती सादिना अभावार्थे अव्ययीभावः तत्र
स्थितोयेदीपकास्तेषांत्रिशिखाज्वालाः यथा त्रिशिखात्रिशिखावर्हि चूडालांगलिकव्यग्रमात्रके चूडामात्रे त्रिशिखायां
चज्वालायांप्रपदेऽपि चेतिमेदिनी समाधिर्ध्यानेसमाधिर्नियमेध्यानेनीवाक्केचसमर्थनेइतिविश्वः तत्रतदर्थं
त्रिशिखानिवातस्थितदीपकानांयथासमाधिस्थितमानसानि॥ तदास्यनिर्यद्वचनैकचित्तनेत्रास्तथातेसकला
बभूवुः॥२९॥ एकाग्रचित्ताः सबभूवयावद्वार्त्ताविधानेश्रवणेपथाने॥ कैलासतः स्वांतरनोदितेनतत्रागनं
निसरुषान्वितेन॥३१॥ वास्थितायेयोगिनस्तेषांमानसान्यंतःकरणानियथामानसंसरसिस्वांतेइतिमेदि
नी तथावभूवुरभवन् अत्रनिवातस्थितदीपकसमाधिस्थितमानसाभ्यामुपमानाभ्यांनैश्चल्यनिस्तर्कत्वेरा
वोक्तेइसेतावानेवपूर्वश्लोकान्नेदः॥३०॥ एकाग्रेतिश्रवणेभगवत्कृतवार्त्ताश्रवणेतेमुनयः यथातथासना
रायणः वार्त्ताविधानेवार्त्ताकृतौयावदेकाग्रचेताः काग्रमनाः बभूवतावत् कैलासतः स्वांतरनोदितेनस्वय ॥८॥

मंतः प्रेरितेन निसरुषा निरंतरक्रोधवता अत्रिजेनदुर्वाससातत्रसभायां आगतं आगमनंकृतंभावेक्तः॥
३१॥ सभामितिस आत्रेयोदुर्वासाः आदाविति त्रिषुः मुनानांसभांनिरीक्ष्यपश्चात्तदनंतरं धर्मेणयुक्तांमूर्त्तिं
सत्स्पृहणीयत्नीलंसद्भिःसाधुभिःस्पृहणीयंस्पृहितुंयोग्यंतत्नीलंसत्स्पृहणीयत्नीलं तस्यभावेसत्कृतेइसमरःतम्
तंप्रसिद्धमुक्तंवचनरत्वईक्षितारंईष्टेग्सावीक्षितातंनारायणंचेससेवक्रमेणददर्शसत्स्पृहणीयत्नीलमितित्रि
याणाक्षिन्नोषणम्॥३२॥ अलब्धेनिनलब्धःप्राप्तःसत्कारोयेनसतस्यभावस्ततातया उरुर्महान्मन्युःक्रो
सभांमुनीनांसनिरीक्ष्यपश्चाद्धर्मेणयुक्तांचददर्शमूर्त्तिं॥ तमुद्धवंसत्स्पृहणीयत्नीलंनरंचनारायणमीक्षितार
म्॥३३॥ अलब्धसत्कारतयोरुमन्युर्दहन्निवालोक्यसभोपविष्टान्॥ कटोन्नतभ्रूकुलेक्षणेक्षोभूमिर्भियाम्रा
सुरिवावतस्थे॥३२॥ धोयस्यसःमन्युर्दैन्येक्रतौक्रुधीत्यमरः अतःसभोपविष्टवान्सदोनिषण्णान्आलोक्य
दहन्दवभस्मत्करिष्यन्निवदहभस्मीकरणेअस्माद्वर्त्तमानसामीप्येवर्त्तमानवद्वेतिवर्त्तमानसामीप्येभविष्य
तिलट्तस्यलटःशातृतत्रशानचाविसादिनात्रात्रादेशः कटावतिन्नोयितेउन्नतेउन्नमितेभ्रुवौयेनसः कटोगजगंडे
कटौभ्रश्रोइसनेकार्थसंग्रहेहैमः कटावनिरायितावक्षिणीइतिमनुष्यवर्गेकटाक्षस्तागस्त्वागमानेकटस्तावद्भ

हरिसं·
॥९॥

सुनियतपुंस्त्वंआरभ्याक्रुधायाम् कुटिलाभ्यामीक्षणाभ्यांनेत्राभ्यामीक्षेक्षणमवलोकनंयस्यसः ईक्षणंद सर्ग·२
र्शनेदृष्टावितिविग्रः पेक्षानृतेक्षणापन्नाङ्गस्मरः अतएवप्रियांभूमिः क्षेत्रमृसुरिवाऽभवतस्थेऽआगसत
स्थोस्थागतिनिवृत्तावस्मात्कर्त्तरिलिटसमवप्रविभ्यः स्थइत्यात्मनेपदम् दस्त्रासोभीतिभीः साध्वसंभयपि
समरः ॥३३॥ तूर्णमितिऽअक्ष्णांयुगमक्षियुगंतत्ताम्रंयस्यसः अंगेनारीरेकंपोयस्यसः पुलकैराचित्तानि
व्याप्तान्यंगानियस्यसः असंसंतंनारुःकोपोयस्यसः नारुः कोपेनारेवज्ञेइतिहैमः विहस्तोव्याकुलः विहस्तो

तूर्णमसताम्राक्षियुगोंगाकंपोदष्टाधरोष्टःपुलकाचितांगः ॥ सभांनिरीक्ष्यातितरांविहस्तोव्यतर्कयत्किंनसभे
तिवेयम् ॥३४॥ सास्यात्सभायत्रवसंतिवृद्धा वृद्धाश्चतेयेश्रुतसर्वशास्त्राः ॥ शास्त्राणितान्येवचयत्रधर्मोधर्मोऽ
पिसन्यत्रमहर्षिमानः ॥३५॥
व्याकुलोसमाविसमरःसमुनिर्दुर्वासाः सभाम् निरीक्ष्यतूर्णसभाविलोकन
क्षणएवदष्टोधरोष्टोयेनतथाभूतः सन्इयम्सभाभवतिनभवतिकिंवाइतिव्यतर्कयत् तर्कंकृतवान् ॥३४
इत्थंवितर्क्यस्वयमेववदतिसेतियत्रसभायाम् वृद्धाः वसंतिसासभास्यात् अन्यथाज्ञेमिनिसत्त्ववत्तरुणसभा
नर्थकर्त्रीस्यादितिभावः येचवृद्धास्तेऽपिश्रुतानिसंप्रदायपुरःसरंगुरुतोऽध्ययनपूर्वंसमाकर्णितानिसर्वाणि ॥९॥

शास्त्राणियैस्तथाभूताःस्युः अन्यथास्वर्गप्राप्त्यर्थसत्रोद्यत्तांगिरसमहर्षिवदनुपयोगाःस्युरितिभावः शा
स्त्राणपितान्येवसंतियत्रयेषुशास्त्रेषुधर्मःस्यात् वर्णाश्रमव्यवस्थयाव्यवस्थितधर्मप्रतिपादकानियानितान्ये
वशास्त्राणिसत्यर्थः अन्यथाकौलागमादिवदनर्थावहानितानिभवेयुरितिभावः धर्मोऽपिसएवसन् यत्रयस्मि
न्धर्मेमहर्षिमानोमुनीनांसन्मानः अन्यथास्वानुष्ठातुरपिमहदतिक्रमतयास्वपदच्युतिप्रसंगात्सनतोभवेः
स्यादितिभावः सभाविशेषणंह्यत्रविशेष्यंधर्मएकल्पः उभयमध्यमानांचपूर्वोत्तरविचारतः अत्रोत्तरोत्तर

मन्मानननानेदमभूतपूर्वमनोविमुह्यत्यवलोकितुर्मे ॥ सन्मार्गसंस्थापनकारिणोयेमार्गेऽपिगच्छंसतिगर्हितेने
यत् ॥३६॥
इत्यपूर्वपूर्वविशेषणतयैकावल्यलंकारः गृहीतमुक्तरीत्यार्थश्रेणिरेकावलीमतेतितल्लक्षणात्
३५ ॥ एवंस्वविचारितंधर्मलक्षणमत्रनास्तीतिपृथ्यमंनिश्चित्यपुनर्विचारयतिमदितिमन्माननानामममाननास
त्कारः अत्रनवर्त्ततेइदम् अभूतपूर्वम् पूर्वंभूतंजातंभूतपूर्वम् सुप्सुपेतिसमासः भूतपूर्वेचरडितिनिर्देशा
त्भूतशब्दस्यपूर्वनिपातः तथाभूतंनभवतीत्यभूतपूर्वंतत् अवलोकितुरेतदवलोकनकर्त्तुः मेममनः वि
मुह्यतिमोहंप्राप्नोतियद्यस्मात्कारणात् सन्मार्गः सदाचारस्तस्यस्थापनकारिणःप्रवृत्तिकर्त्तारः येतेऽपिय

हरिसं· न्तदोर्निसर्सबंधान्तच्छन्नाधाद्वारे ऽपि नरोषः गर्हिते ऽतिनिंदिते मार्गे विप्रावमाननारूपे पथि गच्छंतीति विचरंति सर्ग·३
॥१०॥ इदं च किमिदानीं जातं नाहमेतत्कारणं किंचिदपि वेद्मि परंतु एतेषामनर्थावहः काल एव विप्रावमाननेन संप्राप्त इ
तिभावः ब्राह्मणावमानस्यानर्थावहत्वमुक्तं विदुरनीतौ प्रथमं ब्राह्मणान्द्वेष्टी त्यादिना ॥ ३६ ॥ पूर्वोक्तश्लोकोक्तं गर्
हितमार्गे तद्गमनं निर्दिशति विद्येति ऋषीणां मंडलेन विद्यावलेपात् विद्यागर्वात् अवलेपस्तु गर्वे स्यादिलेपने भूष
णे ऽपि चेति मेदिनी मे मम कृत तरमसंतं द्विवचन विभज्ये त्यादिना विहिततरबंतादमयात् ममो ऽकिमेनि इः अयाद्वादा

विद्यावलेपात्किल मंडलेन कृतो ऽपमानः सुतरामृषीणां ॥ धर्मो ऽप्यसौ मे परिखिन्नतेजा नैरीक्ष्य मां पापवता समानं
॥ ३७ ॥ वितर्कयंत्येव जनास्त्वमानेदक्षं क्रुधि स्थाणुमथोक्षमायां ॥ गाधेः सुतं चेत्सपि चिन्तत एवमहं तो ऽक्षांतियुतः
न्नायेयं ॥ ३८ ॥ स्वद्रुमप्रकर्षेद्वसाधुः स्यात् अपमानः कृतः किल अवद्यानिष्पादितानूनं असौ पुरोवर्तमानः धर्मो
धर्मदेवो ऽपि मां पापवता पापिना समानं सदृशं निरीक्ष्य वै निश्चयेन परिखिन्नतेजाः परा कुपररूपति ॥ ३७ ॥ इदानीं स्वविधे
यत्स्वयं निर्धारयति वितर्कयंतीति जनास्तु लोकास्तु मां मानेदक्षं दक्षप्रजापतिं पदं चेति श्लिष्टरूपकं दक्षस्त्विषु
पटौ पुंसि नाम्नचूडे प्रजापतावितिमेदिनी क्रुधि क्रोधे स्थाणुं हरं स्थिरं चेति श्लिष्टरूपकं स्थाणुः कीले हरे स्थिरे इति ॥१०॥

विश्वः अथो कार्त्स्न्ये भ मंगलानंतरारंभ प्रश्न कार्त्स्न्येष्वथो अथेत्यमरः अक्षमायामक्षांतौ गाधेः कृतं विश्वा
मित्रं वितर्कयंति अहमपि चिन्तेत्यांतः करण एवमेवंविधो ऽस्मीति वेद्मि ततः अक्षांतियुतः अक्षमायुक्तो ऽह
मेतानिति सरोषः न्नायेयं न्नापमेव दद्यां एवं विचार्य न्नापदानमेव निर्धारितवानित्यर्थः उद्देखो ऽलंकारः अत्र हेतु
माह ॥ ३९ ॥ एषामिति महानुयोपमानः तेन मदः तेन उद्धतानां मुख्यं खलानां एषां सर्वेषां प्रमादीनां मदीयो माम
कः न्नापः तदपाय हेतुर्मदीध्वस विनान्नाकारणं भवति मया न्नापं दत्ते सतीति सरोषः ऊर्व्यां भूमौ भूलोकस्य ज

एषां महामानमदोद्धतानां न्नापो मदीयस्तदपायहेतुः ॥ न को ऽपि कुर्यात्पुनरित्थमूर्व्यां विचार्य तानित्यन्नापत्स
रोषः ॥ ३९ ॥ मनुष्यवर्ष्माण्युपयांतु धीलं सर्वे भवंतो मदतिक्रमेण ॥ तत्रापि तिष्ठा नृपस्तु दृष्टदेशाः कृतंगरिष्ठं द
दतूग्रकोपाः ॥ ३० ॥ नैविक्रसर्थः पुनरित्थं को ऽपि कश्चिदपि न कुर्यात् नाचरेत् इति विचार्य सरोषः मुनिः तान्सर्वा
नुद्दिश्य वक्ष्यमाणप्रकारेण अन्नापत् न्नापं दत्तवान् ॥ ३९ ॥ तत्रात्र न्नापरूपमाह मनुष्येति मदतिक्रमेण मम आ
तिक्रांसात् अधीलं मिलायामित्यधीलं अव्ययं विभक्ति समीपेत्यादिना विभक्त्यर्थे ऽव्ययीभावः पृथ्व्यामित्य
र्थः जगती मेदिनी रसा कात्यपी पर्वता धरा स्थिरेलेति हैमः सर्वे भवंतः मनुष्याणां देहिनां यानि वर्ष्माणि तनू[illegible]

राणिना निजपपांतु धारयंतु ऽस्मानुपायूयं मानुपाभवध्वमित्यर्थः ॥ शरीरं वर्ष्म विग्रह इत्यमरः तत्रापि मानु
षत्वे ऽपि तिष्यः कलिश्चैत्र ऽस्मृषो ऽधर्मश्च ताभ्यां तुष्टाय ऽदेसाङ्गते तिष्ठो नक्षत्रभेदे स्यात्कलौ धात्रांत्वयोविन्ता
तिमेदिनी उग्रउत्कटः कोपो येषां ते यद्वा उग्रस्यशिवस्येव कोपो येषां ते उग्रः शूद्रासुते क्षत्रे रुद्रेपुंसित्रिषूत्क
टे इतिमेदिनी ॥ तथाभूताः संतः गरिष्ठं गरीयः अतिमहदिति यावत् कष्टं कृच्छ्रं दुःखमिति यावत् कष्टंतुग
हने कृच्छ्रे इति मेदिनी ददतु युष्मान् पीडयंत्वित्यर्थः ॥ २० ॥ तृतीयं शापमाह तेभ्य इति तेभ्यो ऽस्मरेभ्यः स्मरत

तेभ्यो ऽवमानं स्मरतो ऽलभंतां दक्षेति शापं स बभूव तद्धर्मी ॥ नतो ऽस्मरोपातिशापोध्वनिस्तैर्दुर्वाससो ऽश्राविप
तस्यैव वा ॥ २१ ॥
अस्यं तेऽवमानमवज्ञां अनादरः परिभवः परिभावस्तिरस्क्रिया रीटावमाननावज्ञावलेहन
मुत्सर्जनमित्यमरः लभंतां प्राप्नुवंतां इति शापं चोदीयं दत्वा चोद्यमाक्षेपाभियोगो शापाक्रोशौ दुरेषणे इत्यमरः
स मुनिः तद्धर्मी बभूव मौनेतद्धर्मीतु तूष्णीकमित्यमरः ततस्तदनंतरं अस्य दुर्वाससः रोषेण क्रोधेनातिशापं अ
धिकं यस्य सः कोपः क्रोधामर्षरोषप्रतिघारुट्क्रुधौ स्त्रियामित्यमरः ध्वनिः शब्दः शब्दे निनादनिनदध्वनिध्वा
नरवस्वनाः स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः इत्यमरः तैः सर्वैः पतत्सुवेवानिपतत्सु स्वेवक्रादिनी वज्र ॥११॥

महर्षिस्याकुलीनं त्वभिरूपं वि इत्यमरः उपमायां विकल्पे वेत्यमरः अथो विश्रुतः कर्मणि लुङ् ॥ २१ ॥ नारायण
इति नारायणो नारायणर्षिः उद्धवश्च धर्मश्च तौ मुख्यौ येषां ते तथोक्ताः महर्षयो मुनयश्च मुनिं दुर्वाससम् वी
क्ष्यावलोक्य तस्येति शेषः उद्गतो मुखाद् भ्रष्टस्तस्मात्सो शापस्तस्य शापस्य तस्यैनसाकं सह उत्तस्थुः शापश्रवण
समकालमभ्युत्थिता इत्यर्थः तस्य दुर्वाससो यं तदीयः यः शापप्रपातः शापस्य प्रपतनं तेन सम सह मुनिं प्र
णेमुः प्रणामं चक्रुः स्वमूर्ध्निं तच्छापपतनसमकालं प्रणाममकुर्वन्नित्यर्थः अक्रमातिशयोक्तिरलंकारः ना

नारायणश्चोद्धवधर्ममुख्याः तस्थुरुच्छापरवेण साकं ॥ महर्षयो वीक्ष्य मुनिं तदीयशापप्रपातेन समं प्रणेमुः ॥
२२ ॥ तं तुष्टुवुः संयतपाणयस्ते लेभे न शांतिं स्तुतयापि तेन ॥ भूत्वाथ दीनस्तमुवाच धर्मस्त्यक्त्वा समाधिं सहजं स
धीरः ॥ २३ ॥
रायणर्षिर्योद्धवधर्ममुख्या इत्यपि पाठः उद्धवादीनां नारायणभक्तत्वात् नारायणस्य शापतया भावा
च्च ॥ २३ ॥ तमिति संयतपाणयः कृतांजलयस्ते मुनयस्तं दुर्वाससं र्षिं तुष्टुवुः तथापि तैः स्तुतौ कृतायां सत्यामपि तेन
प्रकुपितर्षिणा शांतिं स्तुक्रोधोपशमनं तु चरमस्त्वर्थे न लेभे न प्रापि लभेः कर्मणि लिट् अथानंतरं धर्मः दीनः भूत्वा
सहजं स्वाभाविकं समाधिं ध्याने समाधिर्ना समर्थने ध्याननीवाकनियमे कामस्य चेगुणांतरे इति मेदिनी सन्त्य

हरिसं. ॥१३॥ सर्ग-३

सप्रसिद्धः धर्मः धीरः धैर्ययुक्तः सन् धीरःस्यात्संइतित्रिषुस्त्वद्वंदे धैर्ययुक्तेचेतिमेदिनी तंमुनिंउवाच ॥ ४३ ॥ दं
डइति कृतामागांसियैस्तेचतेपुरुषाश्चतेषु दंडोदमः दंडोऽस्त्री लकुटेपुमान् मूहभेदेप्रकांडेऽश्वेकोलेमंथान
योऽपि सैन्येमेकाव्हेमानभेदेचंदरांनुगः पारिपार्श्विके। दमेयमेऽभिमानेचेतिमेदिनी युक्तोमाघ्यउचितइत्यर्थः युक्त
मोपिपिकंव्लभ्यंभजमानाभिनीनवत् साम्यचत्रिषुषडिसमरः एतेवयंतव मंतुकृतोऽपराधकारिण आगोपरा
धोमंतुश्चेत्समरः नस्मः नभवामः ज्ञात्वाविबुध्यच्छलेन कपटेनापि अस्माभिः तेतवअपराधोनकृतः यद्विवेक्ति

दंडः कृतागः पुरुषेषुयुक्तोनैनेवयंमंतुकृतस्तवस्मः ॥ ज्ञात्वाछलेनापिनतेपराधोऽस्माभिः कृतोवेक्षियदिव्य
लीकम् ॥ ४४ ॥ इत्युक्तवार्त्ताश्रुतिविच्छरोधस्वकीयगात्रस्मृतिवर्जितत्वात् ॥ अबोधिनास्माभिरिहागतस्त्वत्व
दीयमाहात्म्यभराववोधैः ॥ ४५ ॥ ज्ञात्वाकृतइत्यनानासितर्हितत् व्यलीकंवेत्सि पंतन्मिथ्यावेत्सीसर्थः व्यलीक
मप्रियाकार्यवैलक्ष्येष्वपिपीडने इतिविश्वः त्वव्यलीकमितिपाठेव्यलीकमप्रियेमालेवितथेइतिहेमचंद्रः नवयं
छद्मज्ञानाभ्यामपराधिनः किलबोधेनेसर्थः ॥ ४४ ॥ इतीति हरिणानारायणेनोक्तायावार्त्तातस्याः श्रुतिः श्रवणं
तस्यायश्छित्तस्यरोधोनिरोधः तेनस्वकीयानांनिजानांगात्राणांशरीराणांयास्मृतिः स्मरणंज्ञानमिसर्थः तयाव ॥ १३॥

र्जितानांरहितानांभावस्तत्वंतस्मात् श्रुतिः श्रोत्रेचतत्कर्मणयाम्नायवार्त्तयोः स्त्रियामिति स्मृतिर्धर्मशास्त्रस्म
रणयोः स्त्रियामितिच निरोधोनाशरोधयोरितिचमेदिनी त्वदीयंयन्माहात्म्यंमहिमानस्यभरोऽतिशयः भरो
ऽतिशयभारयोरितिविश्वः तस्माववोधोज्ञानंसविद्यतेएषांतैः अर्शआदित्वादच् अस्माभिः सर्वैः इहावाग
तस्त्वंनावोधिनज्ञातः बुध्यतेः कर्मणिलुङ् दीपजनेसादिनाचिण् चिणोलुगितितस्यलुक् ॥ ४५ ॥ अतिक्र
ममितितेतवमहांतमयिअतिक्रममतिक्रमणंपारवव्रूपतः पराधीनत्वेनकृतमितिकिलपरिमृष्टपविचार्य

अतिक्रमंतेकिलयारवश्यतः कृतंमहांतंपरिमृश्यपत्रापतः ॥ विमोचयास्मान्नवनीतकोमलंद्विजस्यचित्तंस
हसाभवेद्यतः ॥ ४६ ॥ एकाग्रचित्तेनकुशाग्रबुद्धेरश्रुसनिर्व्याजवचांसिसद्यः ॥ तीव्रक्रुधस्तस्यसमोऽतिवेगः
शांतित्वमापद्यतकिंचिद्ग्रः ॥ ४७ ॥ शापातः शापात् अस्मान् विमोचयशापविमुक्तान्कुर्वित्यर्थः यतः द्वि
जस्यचित्तंनवनीतकोमलंहैयंगवीनमिवातिमृदुलंसहसासापराधजनकृतविनयसमकालमेवभवेत्सा
दैव ॥ ४६ ॥ एकाग्रचित्तेनेतिकुशाग्रबुद्धेः सूक्ष्मधियः धर्मस्यनिर्गतोव्याजोमिषंयेभ्यस्तानिचतानिवचांसिच
तानिएकाग्रचित्तेनचित्तैकाग्र्येणव्याजः शाठ्येऽपदेशेऽथेतिमेदिनी आश्रुसाकर्ण्यसद्यस्तत्क्षणमेवतीव्रा

क्रुधकोपोयस्यतस्य तस्य दुर्वाससो मुनेः रुषः क्रोधस्य कोपक्रोधामर्षरोषप्रतिघारुट्क्रुधौ स्त्रियामित्यमरः
उग्रः उत्कटः असंसंतश्चासौ वेगो जवः अतिवेगस्ततोऽब्रवीता वेगो जवे प्रवाहे चेति मेदिनी किंचिदीषन्मात्रम्रा
तिल्वं त्रैगतभावम् आपद्यत प्राप ॥३४॥ इत्येति सदुर्वासा मुनिः इतास्यां तिर्यग्नतं नतेर्नमस्क्रियायाः कारुं
कारकं कारुः शिल्पिनि कारके इति धरणिः तं धर्मं गतं स्वात्मनि प्राप्तं संज्ञाय विहायस्यका इति वक्ष्यमाणमु
वाच हे इन्द्र अवार्योऽदुर्निवार्यो मन्युः कोपो यस्य सोऽहं त्वत्त्वादुभिस्त्वत्प्रियोक्तिभिः वार्यमपि निवर्त्यमपि च

इत्यस्यां तिर्यग्नतं सविहायका रुं नतेर्गतं संज्ञायमित्युवाच ॥ त्वत्त्वादुभिर्वार्यमवार्यमन्युर्हं पापिन्ताप्यं न निवर्त्तयामि
॥३७॥ चेतो मदीयं तव पुण्यमूर्त्तेरकल्मषं किंचन जातमग्रे ॥ वेदत्वमस्यैव हरेः समिच्छां वदामि सत्संज्ञाय पथ्यं वि
धाय ॥३९॥ दुचाटुप्रियं यावाक्यमिति हरचंद्रः चाटुर्नेशिप्रियोक्तिः स्यादित्यत्नमालानां पंप मच्छापनिवारणस्या
भूतपूर्वत्वादितिशेषः न निवर्त्तयामि निवर्त्तनं न करोमीत्यर्थः ॥३८॥ चेत इति पुण्यमूर्त्तेः पवित्राङ्गस्य तव ध
स्यस्य अग्रे निकटे मदीयं मामकं चेतोऽन्तःकरणं किंचनेषत् अकल्मषं निष्पापं जातं अस्त्रीपंकं पुमान्पाप्मा
पापं किल्विषकल्मषकलुषं वृजिनैनो घमंहो दुरितदुष्कृतमित्यमरः हे इन्द्र त्वं इमामिति शेषः अस्य त्वस ॥१३॥

त्रस्य हरेः समिच्छां सम्यक् प्रवृत्तं संकल्पमेव विद्धि इति सत्यं यथार्थं नापथ्यं विधाय वदामि नानृतमित्यर्थः ॥३९॥
नाप इति ततो हरीन्द्रो सन्नत्वात् युष्माकं मे मम अयं शापः क्वापि कस्मिंश्चिद्देहेऽपि कथं चन केनचिदुपायेन
विनिष्फलो निरर्थको मिथ्येति यावत् न स्यान्न भवितैव हे इन्द्र धर्म अनुग्रहस्यानुग्रहं हेरुत्वात् अहं त्वामिदं ब्रुवे ॥ त्वं
मनुष्यदेहे परिधास्यसे धारयिष्यसि डुधाञ् धारणपोषणयोरस्मात्स्यपूर्वादृद ॥४०॥ तत्रापीति तत्रापि मनु
ष्यजन्मन्यपि मूर्द्ध्नेः पत्नी भविता भविष्यति परैर्योनिभिर्मीयते ध्यायते इति तथाभूतः अयं नारायणः सुतनूजः

त्रायतो दियुष्माकमयं ततो मेन निष्फलः क्वापि कथं चनस्यात् ॥ ब्रुवेऽनुग्रहत्वेदमहं वृषत्वां मनुष्यदेहे परिधास्यसे त्वं
॥४०॥ तत्रापि मूर्द्ध्नेर्भविता च पत्नी नारायणोऽयं परमस्तनूजः ॥ रक्षिष्यति त्वां च महर्षिसंघान् दैत्येयकृष्णाद्‌पि त्वर्णमे
व ॥४१॥ कुन्ती भवसोऽष्यणामेष्यपुत्रे पुनः पुनर्वो भगवत्सुदारा ॥ प्रीतिर्भविष्यत्सचिरेण तस्मिन्स्वचिन्तरोधो मवि
नात्याच ॥४२॥ पुत्रोभवेता त्वोमहर्षिसंघाश्च दितिसानपसानियुमांसो दैत्येयाः इतश्चानित्र इसपसेदकृतस्य
अप्रायनेयानायियदसादिनाण्यादेनुः तन्द्रत्वात्कृष्णादपिन्नाकपार्थिवादित्वादुत्तरपदलोपीसमासः त्वर्णमित्री
घ्रमेव रक्षिष्यति युष्माकं सर्वेषां रक्षां करिष्यति ॥४१॥ कुन्तेति एष भगवान् पुत्रः भवसोऽष्यणां भवतां सर्वेषां पो

षणक्रियां कर्त्ता करिष्यति अनद्यतने लुडिति करोतेर्लुट् त्वां युवयोः अचिरेणाकालेन पुत्रे भगवति सति तस्यैव जना
र्दने पुनः पुनः नाम्रुतत्तद्दारात् अतिमहती प्रीतिः स्नेहो भविष्यति तस्याश्च पार्श्वात् तस्मिन् भगवति सविचित्तरोधो ऽन्तःकरण
नियमनं भविता भविष्यति भवतेर्लुट् ॥४३॥ गतिमिति हे मूर्त्ते धर्म वां युवां अथो चित्तरोधानंतरं कृततरो दिव्यां स
दिव्यां गतिं स्वपुत्रभगवत्सदनामिलद्भाषणां समवाप्स्यथः गमिष्यथः भो उद्भव हे मुनीन्द्राः हे महामुनयः यूयं स
र्वेऽनु देहान्मनुष्यदेहान् लब्ध्वा अनूनपानमच्छापाद्विमुच्य स्वसंकल्पेन नृनयनगोचरतां गतेनानेन भगवता सह म

गतिं सुदिव्यां समवाप्स्यथो वां नूनं पापाद्विमुच्यो उद्भव भो मुनीन्द्राः ॥ लब्ध्वा नृदेहान् समवाप्स्यसत्वमनेन यूयं तु गमिष्य
थेनां ॥४३॥ इत्थं गदितो उज्झितचित्तरोषः कैलासमूर्वीधरमासदत्सः ॥ रोषाद्धेते धर्ममुखस्य तस्य नापो ऽभवद्धे
मुनिमंडलस्य ॥४४॥ एवं मेत्रं समवाप्य एनां मूर्त्तिधर्मप्राप्तां दिव्यां गतिं गमिष्यथ प्राप्स्यथ ॥ तत्राप्यादौ सर्वेषां
मुक्तानामपि युष्माकं हरीच्छया मनुष्यजन्मप्राप्त्यनंतरमपि पुनः सैव सगतिरिति तु नाद्दैनोक्तं ॥४३॥ निगमय
तीत्थमिति विन्त्ते रोषः क्रोधश्चित्तरोषः स उज्झितस्त्यक्तो येन सः स दुर्वासाः इत्थं पूर्वोक्तप्रकारेण गदितो उक्तः ॥ कै
लासं कैलासाख्यं उर्वीधरं पर्वतं आसदत् प्राप इत्थं धर्ममुखस्य धर्मो मुखं प्रधानं यस्य तस्य मुनिमंडलस्य रोषा ॥१५॥

द्धेतोः पराधं विनापि नापो ऽभवत् तैव सिद्धं ॥४४॥ कर्त्तुमिति कर्त्तुं मुक्ताक्षरादिभिरपि यद्दत्ताञ्जयाः निष्पन्नं जगत्स
र्गादिकार्यं विधातुं तथा च सूत्रं तगच्छापारवर्त्तमिति तथा अकर्त्तुं ब्रह्माद्य विधेयं विषयभोगकालेस्वबीर्याचरो
धेन तदधःपातमविधातुं तदुक्तं दत्तात्रेय अवरुद्धसौरतइति अथ च अमथा कर्त्तुमुग्र विना नाथा गतपूतनायाः
आततायि च वधे दोषो हंतुर्भवति कश्चनेति वाक्यात् नाम्धेद्वेदं विनानूपत्तेः पि अनंततपोभिः प्राप्य जननी गतिप्र
दानरूपममथा कर्त्तुं समर्थो ऽपि तदुक्तं एघ्याघोषनितांसिनामिसादिनां तं दुर्वाससं न समवारयत् न निवारितवा

कर्त्तुं तथा कर्त्तुमथामथापि कर्त्तुं समर्थः समवारयन्तं ॥ नोपालभन्तेन हरीच्छयेत्थमूचुः स्म ते ऽमी ऽ मममैवेतज्जातं
४५ ॥ तदाब्रवीत् कलितो ऽपि धर्मः कुर्याः सुरक्षामिति नो ऽक्रोधात् ॥ कृतांजलिं तं सहरिर्जगाद नापो ऽयमासीत्स
मदिच्छयेति ॥४६॥ नुनवाप्युपालंभमुपालंभमपि न कृतवान् तेन हेतुना इत्थं हरीच्छया जातम् अवैतज्जानीत यूयं
इति ते धर्मादयः अमी ऽमम ऊचुः परस्परं बभणुः स्मेति पादपूर्तौ ॥४५॥ तदेति तदा तस्मिन्नेव क्षणे धर्मो धर्मदेवः
तं नारायणर्षिम् अब्रवीत् वाक्यमिति शेषः तत्किमित्यपेक्षायामाह हे हरे कलितः कलियुगात् तत्संभवादध
र्मादिसर्थः तत्राप्यक्रोधाद्दक्रवृजात् नो ऽस्माकं धृतमनुष्यजन्मनां सर्वेषां कृततरां याः रक्षा सुरक्षा तां साधार

णरक्षा तु सर्वदेवत्वया क्रियते परंतु विनोष्यरक्षा च समरस्त्वयमिति सूचयितुं करक्षे सुक्तं कुर्याः अस्मत्कृष्णोत ॥ 
वन्नान्कत्वात्त्वमेवावश्यं संपादयेः न्नाकिलिङ्गे त्रिन्नान्कोलिङ् इसमुनाप्रकारेणवदंतमितिन्नोषः कृतांजलिमुक
तोंजलिर्येनतंकृत हस्तसंपुटं अंजलिस्त्कृथुमान्हस्तसंपुटेकुडवेः पिबेतिमेदिनी तंधर्मदेवंसहरिः श्रीनारायण
मुनिः सोऽप्रयंनृपः मदिच्छया भूभारहरणरूपमत्संकल्पेनेस्यर्थः आसीत्ज्जातः इतिजगाद स्वविरहेणासाकु
लितांतःकरणामुमुक्षुवादिमंडलसहितेसस्वप्रसूजनकं वीक्ष्यपरमकारुणिकः कृपामृदुमनाः स्वभक्तत्र
समेधमानाधिकपातकेनासघानिभक्ताभुविसंलभंते ॥ सर्वेतततोऽधर्मकुलंहनिष्येभूत्वाकृतोवांहरिनामधेयः
४७॥ कर्त्तास्मिभूयोपिसत्तांकरक्षामहंदृढज्ञानविरक्तियुक्तां ॥ भक्तिंतनिष्यामिहरन्नधर्मसाकंभवद्भिश्चरिता ॥
स्मिभूमौ ॥ ४८ ॥
ते कनृरणपः श्रीनारायणार्थैर्धर्मनाच मुवाचेस्यर्थः अकथितंचेति कर्मसंज्ञायाअर्थनिबंधनत
यागदलेर्बुविसमानार्थत्वाद्धारव्मितिद्वितीयंक र्माध्याहार्यम् ॥ ४६ ॥ समेति समेधमानं वर्द्धमानं यद्धिकपातकंअ
संतपापंतेनभक्ताः साधवःभुविपृथिव्यांअसघानिअप्रतिष्ठुःखानिसंलभंतेप्राप्नुवंतिष्ठुः तेनोमसनेधुमिसमरः त
तोहेतोःहरिरितिनामधेयंयस्यसः हरिनामाइस्यर्थः नायुवयोर्दपसोः सुतःपुत्रःभूत्वासर्वपापकारणभूतमधर्मकु ॥१५॥

लंहनिष्येवनाशयिष्यामि ॥ ४७ ॥ कर्त्तास्मीति सतांमदेकांतिकभक्तानांभूयोपिप्रचुरामपि कष्टुरक्षाम् अहंक
र्त्तास्मिकरिष्यामित्यथोधर्मश्चज्ञानंमांग्अज्ञानेचविरक्तिर्वैराग्यंचतेर्युक्तांभक्तिंभक्तिरीतिंतनिष्यामिविस्तारयि
ष्येहेमुनीद्राः भवद्भिः साकंसहसाकंसार्द्धंसमंसहेत्समरः अधर्महरन्सन् भूमौपृथिव्यांचरितास्मिविचरिष्या
मिचरतेर्लुट् ॥ ४८ ॥ भक्तेति अथनारायणोऽनंतरंभक्ताः प्रियायस्यसः भक्तानांवाप्रियस्तां लोकभरुलोक
भर्त्तारंभरुभर्त्रेकनकयोरितिहेमचंद्रः रसायाः पृथिव्याईशंनृपतिंएथ्वीत्युपलक्षणंतत्त्वानांपृथिवीपृथ्वीध
भक्तप्रियंलोकभरुरसेशंनृपंतमथुःप्रणम्याथमहर्षयस्ते ॥ अनंतजीवोद्धृतिसंचिकीर्षुनारायणेच्छागततीव्रतापाः
४९॥ श्रीभक्तिधर्मात्मजविष्टरदमीन्नाप्रियोद्भवः श्रीन्नामनोवरूथः ॥ अनेकदेत्रास्थितभूमिकणद्विवंद्रोदधुर्मानुषविग्र
हांस्ते ॥ ५० ॥
तासर्वेमहारसेतिन्नाग्व्राणेवः तंनारायणंमुनिंप्रणम्यनत्वामहर्षयोमुनीद्राःजग्मुर्ययुःकथंभूतास्ते
अनंतानामसंख्यातानांजीवानांयाउद्धृतिनिरूकरणंतस्याः संचिकीर्षुश्चासोनारायणश्चतस्येच्छयासंकल्पेनग
तःप्राप्तस्तीव्रतापोयैस्तेतथोक्ताः ॥ ४९ ॥ श्रीति श्रियानृणिभयायुक्तौभक्तिश्चधर्मश्चतोरूपीणच्छंदसुनीनांसमू
हश्चईन्नाः श्रीनारायणापरपर्यायः श्रीकृष्णः प्रियोपस्यसः तस्यप्रियोवायउद्भवः श्रियोरमायाईन्नाः श्रीन्नाः ॥

मनसोवरूत्थोगृहंनिवासस्थानमिस्यर्थः श्रुत्वाः परमात्मामनोवरूत्थोमनोनिवासस्थानंयस्यसतथोक्तः वरूत्थं
स्यात्तनुत्राणेरथगोपनवेश्मनोरितिहेमचंद्रः तेसर्वेऽपनेकेचतेयेदेवाश्चतेषुस्थितायेभूकरादयोत्राह्मणा
दयश्चतेषांवंशाः अन्वायस्तस्मिन्मानुषविग्रहान्मनुष्यदेहान्दधुर्धारयामासुः वंशाः अन्वायः संतानःसम
रः मनुष्यामानुषामर्त्याइतिचत्वारोरंवर्णाविग्रहः कायोदेहइति ॥ ५० ॥ तस्मिन्निति तस्मिन्क्षणेतस्मिन्काले
क्षणः पर्वोत्सवव्यापारेषुमानेप्यनेहसइतिमेदिनी यद्वाक्षणेमुहूर्त्तेक्षणोव्यापारशून्यत्वमुहूर्त्तोत्सवपर्वसु

तस्मिन्क्षणेभूभृत्रयकोपहृद्भिः स्मरद्विषांवैरजिघृक्षयांते ॥ उद्योगमुल्लंघितधर्ममार्गाश्चक्रुः पुराकल्पहृतास
वोये ॥ ५१ ॥
द्विविरुद्धः स्मरद्विषांअसुराणांअसुरादैत्यदैत्येयदनुजेंद्रारिदानवाः शुक्रशिष्यादितिसुताः पू
र्वदेवाः स्मरद्विषइत्यमरः भयंत्रासश्चकोपः क्रोधश्च तयोर्हद्भिः दरत्रासोभीतिर्भीः साध्वसंभयंकोपक्रोधामर्ष
रोषप्रतिघाइतिचामरः अभूतवभूवयेअसुराः पुरापूर्वेपुरापुराणेनिकटेपूर्वेधातीतभाविविश्वितिमेदिनी हृतमे
नविश्वनाहृताःअसवः प्राणायेषांतेतेअसुराः उल्लंघितास्त्यक्ताः धर्ममार्गायैस्तेहितसत्कर्मोद्यानोयेस्ते
तथाभूताः संतः वैरनिग्रहस्पृहयावैरग्रहीतुमिच्छयाग्रहउपादानेअस्मात्सन्नंतान्नाचेस्त्रियामप्रत्ययः ततष्टाप् ॥१६॥

उद्योगमुपक्रमंचक्रुः विदधुः ॥ ५२ ॥ श्रीति श्रीरिवश्रीर्मूर्त्तिः तयापुरूरवाअसौधर्मदेवश्चतस्यनूपाकपार्थिवादि
त्वादुत्तरपदलोपीसमासः मुनीनांव्रजः समूहस्तस्यचसंबंधसामान्येषष्ठी व्रजोगोष्ठाध्ववृंदेष्वितिविश्वमेदि
नी अत्रेरपत्यपुमानात्रेयोऽद्भुतोत्सवाःइतश्चानिजइतिठक्तस्यराजायादेवाः तस्यनृपापंइतिपूर्वोक्तप्रकारेणजातमु
सत्वंविदित्वाज्ञात्वापुरवः प्राप्ताः प्रभूताइतियावत् तेचतेपूर्वदेवाअसुराश्चपुरुः प्राप्तेऽभिधेयवदितिमेदिनी
उपधर्मपाखंडभजंतियेतेउपधर्मभाजः भजोण्विरितिण्विः तथाभूताः संतः उपधर्मलक्षणंभागवतेसप्तमेऽस्ति

श्रीधर्मदेवस्यमुनिव्रजस्यतांतंविदित्वेतिवसुंधरायां ॥ आत्रेयनृपापंपुरुपूर्वदेवाः प्रादुर्बभूवुर्त्स्वपधर्मभाजः ॥ ५३
केचिद्बभूवुर्बरवोनरेंद्राम्लेछाश्चजातागुरुवेम्बशोषाः ॥ सद्भक्तिधर्माधिकराश्चतिद्याकुकुधिरवद्राधृतमानश्रृंगाः
५४ ॥
ततश्चवसुंधरायामूर्व्यावसुधोर्वीवसुंधरेत्यमरः प्रादुर्बभूवुः उत्पन्नाअभासन्हिनिश्चितंपुरुइति
क्रियाविशेषणंवापूर्वदेवाः सुपसुपेतिसमासः अमायाछिद्देवत्वान्नरूपाः पूर्वेदेवायेभ्योवाबहुव्रीहिः ॥ ५३ ॥ के
चिदितिकेचिदसुराबरवोद्विजाःकृताबभूवुः बटुर्द्विजस्कृतः स्मृतइतिसंसारावर्त्तः केचिन्नरेंद्राराजरूपाः ॥ के
चित्म्लेच्छाम्लेच्छरूपाश्चगोमांसभक्षकोपरुक्तलोकबाह्यंचभाषतेसर्वाचारविहीनोऽसौम्लेच्छइत्यभिधीयते

हरिसं॰ इतिव्यारभाख्यायामूजाताः प्रादुर्भूताः केचित्तुरूणांगुरुत्वेनप्रसिद्धानांआचार्यवीतरागिप्रमुखानांवेषो सर्ग-३
॥१७॥ नेपथ्यमात्रंवेषोयेषांतेवेषाविवेषाण्यागृहेगृहेनेपथ्येचेतिमेदिनी गुरूणांवेषमात्रमेवयेषांनतद्गुणइत्यर्थः ता
ननुवर्णयतिसद्दिसादिनाकश्चसंतांसाधूनांचभक्तेश्चधर्मस्यचाघकराङः खपदादृत्यर्थः मत्तुप्रद्वेविद्यमानेच
ससाम्पर्हितसाधुष्विनिविश्वः ङः खेनोत्सनेव्यद्यमिसमरः कुत्सिताबुद्धिः कुबुद्धिः सास्तंत्रोनिस्त्रिंशाइवसे
वनिस्त्रिंशायेषांतइतिवाखड्गोगंडकश्रृंगेप्यानिस्त्रिंशोगंडकेऽपिचेतिशब्दतरंगिणी जिह्मावक्रावंचकाइ
तानेवधर्माग्रसरान्हृदानिहत्यसमूलामथ्यतेविदित्वा॥ नृतत्वातुमेनाम्सकराप्तदानीमासन्प्रवृत्ताविकराल
वेषाः॥५४॥ तियावत् जिह्मस्कुटिलेमंदेइतिविश्वमेदिनी धृतंमानश्रृंगंमानरूपंविषाणंयैस्तेश्रृंगंविषा
णमाख्यातंगोलांगूलेपुच्छक इति उत्पलिनी स्वभावोक्तिरलंकारः स्वभावोक्तिः स्वभावस्यजात्यादिस्थस्यवर्ण
नमितितल्लक्षणात्॥५५॥ तानितिअथानंतरंतेअसुराः धर्माग्रसरोमुख्योयेषांतान्तान्धृतमानुषदेहा
न्मुनीन्हृदानिस्थिराणिहृत्यसमूलानिविदित्वा तदानीमेवतत्सन्निक्षणात्वविकरालाभयंकरावेषाये
षांतथाभूताःसंतःएनानिहत्यसमूलानिरातव्छदाक्षसिद्धितीयाटीस्वेनइतिएनादेशः नृतवातुप्रवृत्ताआसन्॥

यइति येदानवाअसुराः असुरादैत्यदैतेयदनुजेंद्रारिदानवाइत्यमरः देशिकाआचार्यास्तेषांलिंगंचिह्नमे
षामस्तीतितथोक्ताः अतइनिठनावितीनिः तेचशाक्तेमद्यमांसादिप्रियायादेव्याभक्ताः सेवकाः अभवन्भव
स्यरुद्रस्यचभक्ताअभवन् भवः शर्वोरुद्रइतिश्रुतिः दुष्टआम्नायअभिप्रायोभगवल्लक्षणोहरूपोयेषांतेआ
म्नायः स्यादभिप्रायइतिमेदिनी केचनदानवाः विद्यमुदीक्षयालोकप्रतारणायायाततः यदर्शितनोर्ध्वपुंड्रधारणा
दिवेषप्रवेषेणभवार्णवेभवाब्धौमज्जितोबुडनंकारितोजीवलोकोयैस्तेतथाभूताश्चअभवन्त्रिविधदीक्षाप्र

येदानवादेशिकलिंगिनस्तेभक्ताश्चशाक्तेरभवन्भवस्य॥ दुराम्नायाः केचनविद्यमुदीक्षाभवार्णवेमज्जिततजीवलोकाः
५५॥ नारीर्नसंत्सेगुरवोहिभूत्वामिथ्योपदेशैरस्कवदानवेन्द्राः॥ सकीयसद्वैदिकधर्ममार्गाचक्रुश्च्युतान्रोहितवग
णपंकाः॥५६॥ स्वज्ञानेनाधर्माचरणमेवचक्रुरितिभावः मज्जितेतिहेतुमण्णिजंतान्निष्ठाविधिनारूपसिद्धिः
५५॥ नारीरितिवृद्धानानांसागिनामिवयेषांतेवदानस्यागिवाग्मिनोरिसृजयकोनाः तेअसुरास्ते गु
रवोभूत्वामिथ्याभूतैरकल्याणकरैरुपदेशैः कर्णेफूत्कृतैः नारीः स्त्रीष्यरूपाः स्त्रीः नरान्स्त्रीष्यभूतपुरुषांश्च
रोहितंलक्षणंतद्वद्गणपः पंकोपापंयेषांतेतथोक्ताः संतः रोहितोमृगभेदः स्याद्रोहितंचलक्षणंमतमितिसंसा

रावर्त्तः पंकोऽस्त्री कर्दमे पापे इति मेदिनी स्वकीयत्वमात्मीयोयः सनुवैदिकधर्मो वेदोक्तधर्मस्तस्य मार्गाः प
थाः तस्मात् च्युतानृक्षरितानृपतितानितियावत् चक्रुर्विदधुः हि निश्चयेहिपादपूरणे हेतौ विशेषेत्ववं
धारणे इति मेदिनी ॥५६॥ अपातयन्निति ते अक्रूरगुरवः भवः संसारस्तत्ताप्तिश्रेयः ग्रांकरजन्मस्थितिवि
ष्णुः सएवसिंधुरब्धिः सिंधुर्वमथुदेशाब्धिनदेनेतिमेदिनी तस्पतरीनौका तस्याः नौरूपायाइत्यर्थः स्त्रियां
नौस्तरणिस्तरिरित्यमरः ईब्बतोऽपिमेदिन्यांदन्याल्लोपेटकेतरीतिश्री हृदमस्य भक्तेर्नैवविधायाः साधनभक्ते

अपातयंस्तेभवसिंधुतर्याः श्रीरुद्रभक्तेर्मनुजानजस्त्रं ॥ पाखंडमार्गैरदयावदानाःस्वविग्रहान्संपुपुषुस्त्व
लर्काः ॥५७॥
सकान्त्राप्त् पाखंडमार्गैः स्वोपदिष्टपाखंडोपदेशास्तैःधूपिः करणैः अजस्त्रंप्राचुर्येण अपात
यन्पातयामासुः अदयाइयाभावो निर्दयत्वमित्यर्थः सएवावदानेपराक्रमोयेषांतेपराक्रमोऽवदानंस्या
दितिभागुरिः दयाहीनाइत्यर्थः अतएवअलर्काः रोगान्मादितश्वसदृशाइत्यर्थः अलर्कोधवलार्केस्यात्दो
गोन्मादितकुक्कुरेइतिविश्वः इतस्ततोमत्तश्वानवत्स्वसुरूपान्दृशातइत्यर्थः तथाभूताः संतोऽपिस्वानृस्वकीया
न्विग्रहान्देहानृपुपुषुः पुष्टांश्चकुरित्यर्थः स्वः स्वात्मसुस्वात्मनिज्ञातौत्रिष्वात्मीयेधने स्त्रियामितिमेदिनी अरा

विधापयित्वेतिहिंसयासहवर्त्तमानाः सहिंसास्तेचतेमखावोयज्ञाश्चउरवोयेसहिंसमखवस्तानृमखुर्दैर्मेक्रतो
क्रुधीसवरः हिंसामयचक्रुयज्ञानित्यर्थः विधापयित्वाकारयित्वा तत्रयज्ञेषु पशूनजमृगादीन् जघ्नुः आपादया
मासुः पशुर्मृगादिदेवातेइतिमेदिनी चकिंचतेइतिन्नोषः अभिचारेमोहनादिकर्मविद्वेतेण्युतैः तदस्यास्तिअ
न्नितिमतुविनितिमतुप्माडुपधायाश्चमतोर्वोयवादिभ्यइतिमतोर्मस्यवः मंत्रैः भैरवादीन्भैरवमुखांस्तामसदेवा
नृआराध्यसंसाराध्यवद्गाहूसेतियावत् मंत्रोवेदविशेषेस्याद्देवादीनांचसाधनेइतिमेदिनी उरोधोन्तःयः रोधो

विधापयित्वोरुसहिंसमखान्जघ्नुःपशूंस्तत्रचभैरवादीन् ॥ आराध्यमंत्रैरभिचारवद्भिर्विश्वंवशीचक्रुरधर्मवन्तः ॥
५८॥ नेऽमांगनासंगमकृवर्णचौर्यकृत्याग्रविप्राहतिमद्यपानाः ॥ इत्यंहिवेदोदितधर्ममार्गच्छेत्तुंप्रवृत्ताः सततंबभू
वुः ॥५९॥
किंवंतइतियावत् असंबोधनरोधोन्त्योरितिमेदिनी धर्मस्यधर्मवावकाः अत्रानिवद्धर्मविध्वंसकाः संतः अ
थवक्रोऽर्थानिर्द्वयोरितिनामभिधानकोशः यद्धानामैकदेशेनाममात्रस्यापिग्रहणमाभाकावत् तेनउइसनेनो
पोपसर्गः एवंसतिउधर्मउपधर्मः पाखंडतत्रवञ्चावञ्चवत्कागिमेतामन्त्काइत्यर्थः अधर्मवत्त्वाइतिपाठेअधर्मव्रजं
तिगच्छंतीत्यधर्मवत्ताः वज्जगतावस्मादर्जेइतिरक् विश्वंजगद्वशी चक्रुः वशवदधुः ॥५८॥ तइति अमाः स्वस्त्री

हरिसं० भिन्नायाः अंगनाः स्त्रियः तासां संगश्च सुवर्णस्य चौर्यं च इत्येमां संतस्यानृतेः न्नानं च विप्राणां द्विजानामाद इति राहननं सर्ग० ३
॥१९॥ चमद्यस्यैकादशविधस्य मधुनः पानं च उपलक्षणमेतत्रिविधसुरापाः तानि विद्यंते एषां तथोक्ताः अन्यानादि
भूदसवृतेः सुराः इत्थं पूर्वोक्तप्रकारेण सततं निरंतरं वेदेनत्रय्या उदितः उक्तो यो धर्ममार्गस्तं छेत्तुं दर्तुं प्रवृत्ताः उ
द्योगिनः बभूवुः आसन् ॥ ५९ ॥ तेषामिति तेषां गुरुरूपाणां मस्करिणां वृषं धर्मं हंतीति तथोक्ताः मूलविभुजादि
ताइत्यतेः कलिशुनि चित्तेपायैः पूर्णाः पायांतः करणाइत्यर्थः लिशुचित्तेन पुंसकमितिवररुचिः नरलोकपाला
तेषामभूवन्नरलोकपाला त्रिष्णा वृषघ्नालिशुपापपूर्णाः ॥ तेवासुरागागुरुत्रिष्णलिंगाश्चक्रुर्हि कर्माण्यपति
गर्हितानि ॥ ६० ॥ राजानः त्रिष्णाः अभूवन्नुसानुरूपगुरुभ्योदीक्षामग्रहन्निसर्थः एवंगुरवश्च त्रिष्णाश्चतेषां
लिंगं चिह्नं चिह्नमात्रमेव विद्यते येषां ते तेपूर्वोक्तलक्षणयुक्ताः वासुरागात्रिसत्संगाच्छंतिसंचरंतीति वा
सुरागानक्तंचराक्षसाः इतियावत् वासुरा वा त्रिंता रात्रौ रिति हेमचंद्रः राक्षसः कोणपः क्रव्यात् क्रव्यादोस्र
पआशरः ॥ रात्रिंचरइत्यमरः ॥ अतिगर्हितानि अत्यंतं निदितानि कर्माणि धर्मोच्छेदनरूपाणि चक्रुः ॥ इत्थं
नवंतः हिनिश्चितं हि पादपूरणे हेतौ विशेषेस्यवधारण इति मेदिनी ॥ ६० ॥ ॥१९॥

पापेति दंभक्रोधादिर्येषां दर्पादीनां तैर्युतायुक्ताः पापं पापरूपमायुर्येषां ते अदंतो व्यायुनाच्च्इत् तदायुषाजदायुं
च विद्यादायुं तथायुषेति द्विरूपकोशः वायुनाजगदायुनेति त्रिणविवेकश्च त्रिष्णे निजदीक्षितैः सह वर्तमानाः
ते सुरगुरवः इत्थं पूर्वोक्तप्रकारेण अतीवात्यंतं अधर्मं धर्मविरुद्धं पापमित्यर्थः चक्रुरकुर्वन् तेषां भारं गोरवं
सोढुं क्षंतुं अत्राक्षुवसाः समर्थयाक्षितिसा च कंपे मुहुर्मुहुश्चलितभावेलिट् अस्याचासौ दृष्टिश्च दृष्टिद्रुपमेसर्थः
अभवत्तु बभूव किमतिवर्णनेन तेषां पापाचरणस्येति हि शब्देन सूचितमितिभावः ॥ ६१ ॥ एवं सामान्यतो धर्मा
पापायवश्चक्रुरधर्ममित्थं ते अतीवदंभादियुताः सनिष्णाः ॥ सोढुं हितद्वारमनाक्षुवसाक्षितिसा च कंपे भवदप्यय
दृष्टिः ॥ ६१ ॥ अनाहृतांतः करणास्य रम्यैः सुरेंद्रगम्यैर्विषयैरजस्त्रम् ॥ वरीयसः श्रीहरिभक्तिभाजां स्कमंगलां तस्य
जनिं वदामि ॥ ६२ ॥ द्विजन्मकथनप्रसंगेनात्सुरोपदवं तत्कृता धर्मप्रवर्तनं चातुर्वर्ण्येषदानीं विशेषतो भगवत्साक्षु
र्भावार्थं तत्कुलस्य शुद्धिमनुस्मरत्कविः श्रीधर्मदेवजन्मोत्कर्षं धर्मपितरं कुलग्रामाद्युक्तिपूर्वकमनुवदत्सनाहृते
सादिनात्अनाहृते तिसुरेंद्रः सुरपतिः सुरपतिर्बलारातिः शचीपतिरित्यमरः तेनगम्यैः प्राप्यैर्भोग्यैरितिया
वत् रम्यैरमणीयैः विषयैः स्रक्चंदनादिभिः अजस्त्रं सदैव अनाहृतमनाकृष्टमंतः करणं यस्य तस्य श्रीहरि

भक्तिभाजांश्रीपुरुषोत्तमवासुदेवभक्तिमतांवरीयसोऽतिश्रेष्ठस्यद्विवचनविभक्तेसाद्विनावरत्वाद्वादीयस्तनु
तस्यधर्मदेवस्यस्फुटंमंगलंयथायस्यांवातथोक्तांजनिमुञ्जयंजनिरुस्तस्त्रिरुद्धवद्धसमरः चदामिवन्नातिरुचे
रुक्तिः॥६३॥वर्षइति अत्रवर्षेभरतखंडेवर्षोऽस्त्रीभारताद्यावित्यमरः दिवःस्वर्गस्यस्वर्गनाकत्रिदिवत्रिदशाल
याः सुरलोकोद्योदिवौद्वेस्त्रियामित्यमरः निवेशेनविन्यासेननिवेशःस्त्राविन्यासेस्थितिविश्वः समान
स्तुल्यः पूर्वइत्यभिधयासंज्ञयाप्रसिद्धःख्यातः देशोजनपदः अस्तिइतिशेषः यत्रदेशेप्रजाजनाः प्रजास्यात्संत

वर्षेऽत्रपूर्वाभिधयाप्रसिद्धोदेशोनिवेशेनदिवः समानः॥धर्मोत्तराःशौर्यगुणाश्चयत्रप्रजाःस्त्रियःसंतिपति
व्रताश्च॥६४॥तत्रापियःसारवनामधेयोऽस्त्यावांतरोदेवमहर्षिसेव्यः॥विनीतवर्णाश्रमधर्मयुक्तलोकस्तत्रो
ऽपवनाभिरामः॥६५॥

तौजनइत्यमरः उत्तरउत्तमोधर्मोयासांताधर्मोत्तराः वाहिताग्न्यादिः उत्तरंप्रतिवाक्ये
स्यादूर्ध्वोदीच्योत्तमेषुचइतिविश्वः यद्वा धर्मउत्तरःप्रवरोयासांताः उत्तरंप्रवरोर्ध्वयोरित्यभिधानचिंताम
णिः वचनलिंगत्वंविशेषकोनुज्ञेयमितिशौर्यगुणास्तशौर्यगुणोयासांताः शूरस्तविक्रांतइत्यस्यअर्थः संतियत्रदेशे
स्त्रियश्चपतिव्रताःपत्यौव्रतंनियमोयासांताःसंतिप्रस्तेलट्॥६४॥तत्रेतितत्रापिपूर्वदेशेऽपिदेवाश्चमहर्षय ॥२७॥

श्चतैःसेव्यःआश्रयणीयःसारवनामधेयः यःदेशःसोऽस्यपूर्वदेशस्यावांतरोंतर्गतोदेशः अस्तिदेविकायांसरय्वां
चभवनेदैविकसारवावित्यमरः तत्रापिवर्णाब्राह्मणादयश्चत्वारश्चआश्रमाब्रह्मचर्यादयश्चत्वारश्चतेषांधर्मः
पालनादंडमौंजीबंधनाद्यंगब्रह्मचर्यपालनादिस्तेनयुक्ताः विनीताविनयवंतोवर्णाश्रमधर्मयुक्ता लोकाः
यस्मिन्ततस्तदुक्तोभायेषांतानिचतानिउपवनानिवनेतैरभिरामं श्रीरंकुहट्टाख्यपुरंअस्तिइतिपरेणान्वयः॥६५
श्रीरंकितिरमंतेक्रीडंतितत्रनायत्रेतिरंकवः यद्वारज्यंतेरभिरितिरंकवः मृगयाद्विस्यात्साधुःहट्टाःपण्यवीथि

श्रीरंकुहट्टाख्यपुरंद्विजन्मागुणैर्गरीयानितिबालशर्मा॥नाम्नाश्रुतोभार्गववैतहव्यसावेतसारस्वप्रवरोध्रुवा
सः॥६५॥सावर्णिगोत्रःशुभसामवेदःसकौथुमीनागलउदारकीर्तिः॥चक्रेहरेर्धर्मयुतांस्ततांस्तभक्तिंतदीयचरि
त्राकथनादिसक्तः॥६६॥ श्रीकायस्मिन्तत्तथाभूताऽस्थायस्ततत्तत्सुरंचश्रियायुक्तंरंकुहट्टाख्यपुरं अ
स्तितत्रेतिशेषः गुणैःशमदमादिविप्रगुणैः गरीयानतिश्रेष्ठः नाम्नाआख्यया आख्याह्वेअभिधानंचनाम
धेयंचनामचेत्यमरः बालशर्माइतिश्रुतःख्यातः भार्गवश्चवैतहव्यश्चसावेतसश्चते आम्नायेयेषांतानिप्रवराणिय
स्यसतथोक्तः द्विजन्माब्राह्मणः अध्युवासवसतिस्मउपान्वध्याङ्वसइतिकर्मत्वं॥६५॥सावर्णीतिसावर्णि

संज्ञगोत्रयस्यसः श्रुभः सामसामाख्योवेदोयस्यसः कौथुमीइसाख्याश्वलायस्यसः संज्ञापूरणपोष्ठेनियुंवज्ञ
वनिषेधः नुदाराकीर्त्तिर्यस्यसः सवात्सन्नामोद्विजः हरेः ब्रुदमस्यधर्मयुतांधर्मइसुपलक्षणंज्ञानवैराग्ययोः ध
र्मः स्वधर्मोद्वाद्शलक्षणवान्स्नतस्जातोम्क्तस्तेनयुतांयुक्तांस्भक्तिःश्रवणादिनवप्रकारांतस्येहरेरियंयाली
लाचरित्रंतस्याः कथनंस्मादिर्यस्यस्मरणादेः तत्रसक्तः आसक्तः सन् चक्रेकृतवान् चतुर्भिः कालापकं ॥ ६६ ॥ त
स्येति तस्यबालनाम्नेविप्रस्यमाता भाग्यवतीतिख्यातात्रिसिद्धास्तुतानामसहत्वंयस्याःसतीभिःपति
तस्याभवज्ज्ञाग्यवतीतिनाम्नाख्यातातास्त्रीलारमणीसतीजा ॥ पतिव्रताधर्मपरायणोक्तापरेश्चभक्तिःपतिनिष्ठ(
भावा ॥ ६७ ॥ शुहांकुर्वैलंश्रुमितेथभद्रपदर्क्षकर्तेर्द्रदिनेप्रमोदे ॥ पक्षेऽर्जुनेस्त्रांम्भुतिथौघटांजेयाम्येऽयनेऽसूतबुधेऽ
य ॥ ६८ ॥

वृताभिरीराख्यस्मासतीसाध्वीपतिव्रतेत्यमरः पतिव्रतायाधर्मएकपत्नीत्वंतस्मिन्परायणाएकाप्र
धानभूतायस्याःपतिव्रताधर्मएवपरमुत्कृष्टमयनंयाण्यंयासांतास्ताएकाश्रेष्ठाएकंतुकेवलेश्रेष्ठइत्यमरस्मिन्स्युता
स्यवदितिविश्वः परःपरमात्माचासावीशोनियंतावतस्यभक्तिर्भजनंपरेश्चभक्तिस्तस्यांप्रतिनिष्ठः स्थितोभावो
यस्याःसारमणीपत्नीस्भवद्धभूतपोऽरिपरमात्मनोत्तिर्वैतपंती ॥ ६७ ॥ शुहेतिगुह्वनाज्ञेनकार्त्तिकेयाननादि ॥३१॥



षट्लक्षणाद्यावगंतव्यानिगुहः षट्चस्जंकानववच्चैलाः सप्तचइंकुरेकश्चतेर्मितेनंशैलादीनांविषयभेदेऽपि
साहित्यविवक्षायांइंधः वर्षेइतिशेषः प्रमोदेप्रमोदनाम्निसंवत्सरेयाम्येऽयनेदक्षिणायने ऊर्जेकार्त्तिकेमा
सिकार्त्तिकः बाहुलोर्जाविश्यमरः अर्जुनेपक्षेशुक्लपक्षेबुधेबुधवारेत्रांभुतिथावेकादश्यांदिनार्द्धेमध्याह्नका
लेभद्रपदर्क्षेउत्तरभद्रपदानक्षत्रेप्रोष्ठपदाभद्रपदाःस्त्रियः नक्षत्रमृक्षंभमित्तिचामरः घटांगेकुंभलग्ने ज
ननंमूर्त्तिस्तथांगमितिजातकालंकारेलग्नपर्यायोगतत्वाद्दः अर्थेतिमंगलेमंगलाउत्तरारंभप्रश्नकार्त्स्येष्वथो
पर्यस्यइरिमहसाप्रकाश्यंतंविभ्राणंरुचिरतरामरिष्टव्याख्याम् ॥ तंवीक्ष्यप्रियमतिविस्मितात्मसूनुंसंपेदे(
मुदमधिकांप्रसूस्तदानीम् ॥ ६९ ॥ इतिश्रीहरिसंभवामहाकाव्याख्येकविश्रीमदचिंसानंदवर्णिकृतोकृष्ण(
स्मातिनारायणकृतप्रश्नोत्तरादिकथनंनामतृतीयसर्गः ॥ ३ ॥

अथेत्यमरः सभाग्यवतीत्वथंधर्मसंज्ञंपु
त्रमसूतप्रसुवे ॥ ६९ ॥ पर्यस्यदितिपर्यस्यस्वसर्पद्यइरेश्चंद्रस्येवप्रहस्लेतस्तेनइरिश्चंद्राकर्यवाताम्रशुक्भेकस्य
माहिक्षितिर्मेदिनीमहीभवेइस्वतेजसोश्चेतिविश्वः अरिष्टेमूतिकागृहेन्याय्यासां अरिष्टंमूतिकागृहमि
त्यमरः न्याय्यात्सेत्राह्वगुंफइतिविश्वः प्रकाश्यंतंविभ्राजमानम् अतिन्यायेनसचिरंस्कंदरामतिरु विरांस्कं

दरंरुचिरंचारुरूपमंसाधुशोभनम् कांतंमनोरमंरुच्यंमनोज्ञंमंजुमंजुलमित्यमरः श्रियंशोभां श्रीर्वेषरच
चनाशोभेतिविश्वः विश्राणान्प्रतिनायेनदधानं आत्मसूनुंस्वसुतम् पुत्रेस्युजेरवापितिविश्वः तंपूर्वोक्तं
रूपंवीक्ष्यदृष्ट्वा तदानींस्वसुतवीक्षणक्षणएवप्रसूर्माताजनयित्री प्रसूर्माताजननीत्यमरः असंसंतंवि
स्मितामसती अधिकामतिनायपुत्रकोमुदंहर्षंसंपेदे अगमत् संपूर्वापद्यतेः कर्तरिलिट् प्रहर्षिणीवृत्तं
म्नौत्तौगास्त्रिदशयतिः प्रहर्षणीयमितिलक्षणात् ॥ ६९ ॥ इतिश्रीपदवाक्यप्रमाणपारावारीणधुरीणवि
श्वनाथभट्टात्मजदीनानाथभट्टशिष्यप्रत्यक्षवासुदेवश्रीसहजानंदस्वामिचरणकमलोपासकगोपा
लानुमंतःप्रेरितमतिमाधवदासस्तत्सहायमासाद्यटंकरपानुंकरात्मजश्रीहरिकृष्णैकभक्तभीलाना
थकृतोहरिसंभवकाव्यस्यविद्वज्जनाह्लादिन्याख्यव्याख्यायांतृतीयःसर्गः ॥ ॥ ३ ॥ ॥ समाप्तः ॥ ॥
लि० राचलजेठाभोरारजी संवत् १९५६ नामहाशुदी १४ नेदिवसेंमेंथाणग्रामेसमाप्तलिख्युंछे ॥ ॥